Shri Raghunatha Temple MSS. Library,
JAMMU

No. ११७८ घ

Title पौरुष सूक्तेन विष्णु पूजनम्

Author

Extent २ पत्रे Age

Subject धर्मशास्त्रम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पोरुषसूक्तेन विसर्जनम्

११७८

2

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ११२६८५ विष्णुपूजनादि

॥श्रीगंणेसाय नमः॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्र
पात्॥ स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलं॥ आवाहनं स
मर्पयामि॥ पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यं॥ उतामृतत्व
स्येशानो यदन्नेनातिरोहति॥ आसनं समर्पयामि॥ एतावान
स्य महिमातो ज्यायांश्च पूरुषः॥ पादोस्य विश्वा भूतानि त्रि
पादस्यामृतं दिवि॥ पाद्यं समर्पयामि॥ त्रिपादूर्ध्व उदैत्पुरुषः
पादोस्येहाभवत्पुनः॥ ततो विष्वङ् व्यक्रामत्साशनानशने
रभि॥ अर्घ्यं समर्पयामि॥ तस्माद्विराळजायत विराजो अधि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ष्टिपूरुषः॥ सजातोअत्यरिच्यतपश्चाद्भूमिमथोपुरः॥ आचम
नीयंसमर्पयामि॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत॥ वसं
२ तोअस्यासीदाज्यंग्रीष्मइध्मःशरद्धविः॥ स्नानंसमर्पयामि॥ तं
यज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः॥ तेनदेवाअयजंतसाध्या
ऋषयश्चये॥ वस्त्रंसमर्पयामि॥ तस्माद्यज्ञात्सर्वहुतः संभृतं
पृषदाज्यं॥ पशूंस्तांश्चक्रेवायव्यानारण्याग्राम्याश्चये॥ यज्ञो
पवीतंसमर्पयामि॥ तस्माद्यज्ञात्सर्वहुतऋचः सामानिज
ज्ञिरे॥ छंदांसिजज्ञिरे तस्माद्यजुस्तस्मादजायत॥ गंधंस०॥१॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तस्मादश्वा अजायंत ए के चोभयादतः ॥ गावो ह जज्ञिरे तस्मा
तस्माज्जाता अजावयः ॥ पुष्पं समर्पयामि ॥ यत्पुरुषं व्यदधुः
कतिधा व्यकल्पयन् ॥ मुखं किमस्य कौ बाहू का ऊरू पादा उच्य
ते ॥ धूपं समर्पयामि ॥ ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः
कृतः ॥ ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ दीपं सम
र्पयामि ॥ चंद्रमा मनसो जातः चक्षोः सूर्यो अजायत ॥ मुखा
दिंद्रश्चाग्निश्च प्राणाद्वायुरजायत ॥ नैवेद्यं समर्पयामि ॥ ना
भ्या आसीदंतरिक्षं शीर्ष्णो द्यौः समवर्तत ॥ पद्भ्यां भूमिर्दिशः श्रो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

त्रातथोलोकां अकल्पयंन॥ ताम्बूलं स०॥ सप्तास्यासन परिधयः
त्रिःसप्तसमिधः कृताः॥ देवाय[illegible] यज्ञं तन्वाना अबध्नं पुरु
॥२॥ षंपशुं॥
षंपशुं॥ दक्षिणां समर्प०॥ नमस्कारं॥ यज्ञेनयज्ञमयजंत
देवाः स्तानिधर्माणि प्रथमान्यासंन॥ तेहनाकंमहिमानं संव
न्तुयत्र पूर्वेसाध्यासंति देवाः॥ मंत्रपुष्पं समर्पयामि॥ ६॥
वामदेवाय नमः॥ स्नानं स०॥ ज्येष्ठाय०॥ वस्त्रं स०॥ श्रेष्ठाय०
उपवी० रुद्राय० अलंकारं०॥ कालाय० गंधं० कालविकरणा०
अक्षतां० बलविकरणाय० पुष्पं० बलाय० धूपं० बलप्रमथना०
दीपं० सर्वभूतदमनाय० नै० मनोन्मनाय० तां० अघोरेभ्यः
दक्षिणां० तत्पुरुषाय० नीराजनदीपं०
त्र्यंबकंयजा० मंत्रपुष्पं समर्पयामि॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative